ऽनुपूर्व्वा इतरे, कात्या० ८,८,२९ "इतरे दश पशवः अनन्वारब्धा एव अनुपूर्व्वाः अनुगामिनो भवेयुरिति" व्या० निकृष्टप्रमाणे च "अनुपूर्व्वाइतरे" कात्या० ८,८,२०, "अनुपूर्व्वाः निकृष्टा ह्यनुगच्छन्ति अत्र च प्रमाणेन निकृष्टत्वम्। अतश्च दक्षिणस्य वर्षिष्ठत्वमुक्तं तत्र उत्तरस्य तदपेक्षया हीनप्रमाणत्वं तदपेक्षया तत्र उत्तरस्य, तदपेक्षया तदुत्तरस्येत्येवमेकादशो यूपः सर्वतो निकृष्टो यथा भवति तथा कर्त्तव्यमिति" व्याख्या। अनुपूर्व्व+भावादौ ष्यञ्। आनुपूर्व्यं तद्भावे षित्त्वात् चातुरीवत् वा स्त्री "साजत्यञ्च समानानुपूर्व्वीकत्वेनेति" जग०। वेदे पू० पूर्व्वपदह्रस्वः। अनुपूर्व्वी आनुपूर्व्व्य स्त्री। "वर्षिष्ठरशनः पुरुषोऽनुपूर्व्व्या इतरेषामिति" कात्या० १६,१,९, "अनुपूर्व्या ह्रिव्यामया रशनया" इति व्याख्या।

**अनुपृष्ठ्य** त्रि० अनुपृष्ठं बध्यते अनुपृष्ठ+यत्। पृष्ठमध्ये बध्यपाशादौ "अनुपृष्ठ्यामायस्य पाशयोरिति" कात्या० १६,८,५।

**अनुपेत** त्रि० न उपेतः। उपगतभिन्ने। उपगमनञ्च उपनयनार्थं गुरुसमीपगमनम्, तच्छून्ये च। न स्त्री जुहुयाद्वानुपेत" इति स्मृतिः "अनुपेतः अनुपनीतः" इति रघु०। "यं प्रव्रजन्तमनुपेतमपेतकृत्यमिति" भाग० अत्रापि शुकस्य विद्वत्त्वेन कृत्यसामान्याभावेन अनुपनीततयैव प्रव्रज्योक्तिः।

**अनुप्रदान** न० अनुप्रदीयते वर्णविशेषरूपता आधीयते अनेन अनु+प्र+दा—करणे ल्युट्। वर्णोत्पादनवाह्यप्रयत्नभेदे "एते श्वासानुप्रदाना अघोषाश्च विवृण्वते" इति सि० कौ०। श्वासः अनुप्रदानं वाह्यप्रयत्नो येषामिति तत्त्वबो०। "अनुप्रदानात् संसर्गात् स्थानात् करणविन्ययात्। जायते वर्णवैशेष्यं परिमाणाच्च पञ्चमादिति" शिक्षा।

**अनुप्रवचन** न० अनुरूपं गुरुमुखोच्चारितानुरूपं प्रवचनम्। गुरूच्चारितानुवचने। तत्प्रयोजनमस्य छ। अनुप्रवचनीयः तथाभूताध्ययनप्रयोजनयुक्ते त्रि०।

**अनुप्रवचनादि** पु० ईत०। पाणिन्युक्ते "तदस्य प्रयोजनमित्यर्थे विहितप्रत्ययनिमित्ते प्रकृतिभूते शब्दसमूहे। अनुप्रवचन, उत्थापन, उपस्थापन, संवेशन, अनुप्रवेशन, अनुवादन, अनुवचन, अनुवाचन, अन्वारोहण, प्रारम्भण, आरम्भण, आरोहण।

**अनुप्रवेश** पु० अनु+प्र+विश+भावे घञ्। अनुरूपप्रवेशे "पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमा" इति रघुः। अमावास्यायाञ्चन्द्रार्कयोः एकराश्यवस्थितत्वेन सूर्य्यमण्डलादधःस्थितत्वाच्चार्काच्चन्द्रस्यान्तरगतौ सूर्य्यरश्मेरिन्दौ प्रवेशः तदुत्तरञ्च क्रमशःप्रवेशाधिक्यम् "सलिलमये शशिनि रवेर्दीधितयोमूर्च्छितास्तमोनैशम्। क्षपयन्ति दर्पणोदरनिहिता इव मन्दिरस्यान्तरिति" वृहत्स०। यथा च तस्याधस्थःत्वं तथा इन्दुशब्दे वक्ष्यते। तथाहि यावद्यावच्च सूर्य्यात् चन्द्रमाः पूर्वं गच्छति तावत्तावदेव व्यवधानानुरूपेण सूर्य्यरश्मेस्तत्र क्रमशःप्रवेशः।

**अनुप्रासः** पु० अनुगतः रसाद्यनुगुणं प्रकृष्टमासं वर्णन्यासं समवर्णरचनां समवर्णोच्चारणं वा गतिस०। अलङ्कारप्रसिद्धे स्वरवैषम्येऽपि समवर्णानां तुल्यरचनारूपे "अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् (सा०द०) उक्ते शब्दालङ्कारभेदे। स च पञ्चधा ते च सोदाहरणमुक्ता दर्पणे यथा "छेको व्यञ्जनसङ्घस्य सकृत् साम्यमनेकधा"। छेकश्छेकानुप्रासः। अनेकधेति स्वरूपतः क्रमतश्च। रसः सर इत्यादिक्रमभेदेन सादृश्यं नास्यालङ्कारस्य विषयः। यथा "आदाय वकुलगन्धानन्धीकुर्व्वन् पदे पदे भ्रमरान्। अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः"॥ अत्र गन्धानन्धीति संयुक्तयोः, कावेरीवारीत्यसंयुक्तयोः। पावनः पवन इति बहूनां व्यञ्जनानां सकृदावृत्तिः। छेको विदग्धः तत्प्रयोज्यत्वादेष छेकानुप्रासः। "अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा। एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते"॥ एकधा स्वरूपत एव न तु क्रमतोऽपि। अनेकधा स्वरूपतः क्रमतश्च। सकृदपीत्यपिशब्दादसकृदपि। यथा "उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः। नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः"। अत्र रसोल्लासैरमी इति रसयोरेकधैव साम्यम्। न तु तेनैव क्रमेणापि। द्वितीये पादे तु कलयोरसकृत् तेनैव क्रमेण च। प्रथमे एकस्य तकारस्य सकृत्। रसविषयव्यापारवती वर्णरचना वृत्तिस्तदनुगतत्वेन प्रकर्षेण न्यसनाद्वृत्त्यनुप्रासः। "उच्चार्य्यत्वाद्यदेकत्र स्थाने तालुरदादिके। सादृश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते"॥ यथा "दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः। विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः"॥ अत्र 'जीवयन्तीति" "या इति" "जयिनीरिति" अत्र जकारयकारयोरेकत्र स्थाने तालौ उच्चार्य्यत्वात् सादृश्यम्। एवं दन्त्यकण्ठ्यानामप्युदाहार्य्यम्। एष च सहृदयानामतीव श्रुतिसुखावहत्वाच्छ्रुत्यनुप्रासः। "व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु। आवर्त्त्यतेऽन्त्य-